# utathyagItA from Bharatamanjari of Kshemendra

# ઉતથ્યગીતા ભારતમઞ્જર્યાં ક્ષેમેન્દ્રવિરચિતા

## Document Information

Text title : utathyagItA from Bharatamanjari of Kshemendra

File name : utathyagItABM.itx

Category : giitaa, kShemendra

Location : doc_giitaa

Author : Kshemendra

Description/comments : kAvyamAlA 65. Bharatamanjari

Latest update : October 15, 2022

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 15, 2022

*sanskritdocuments.org*

# ઉતથ્યગીતા ભારતમઞ્જર્યાં ક્ષેમેન્દ્રવિરચિતા

તસ્માત્ક્રમાગતં કુર્યાદ્દ્રષ્ટારં નૃપતિર્હિતમ્ ।
ભવન્તિ યદ્ભયાત્સર્વે કાયસ્થા ભિન્નસંહતાઃ ॥ ૧૩.૩૫૧॥

દાસાધિપશતસ્યૈકો ભવેદુપરિચિન્તકઃ ।
તત્સહસ્રસ્ય ચાધ્યક્ષઃ સર્વં રાજ્ઞો નિવેદયેત્ । ૧૩.૩૫૨॥

ઘોષં ગ્રામં પુરં રાષ્ટ્રં ભક્ષયન્ત્યધિકારિણઃ ।
ક્રિયન્તે યદિ ન પ્રાજ્ઞૌરુપર્યુપરિ ચિન્તકાઃ ।
મલોપદાનેનાર્હાશ્ચ તીવ્રપાકાનિવારિણઃ ॥ ૧૩.૩૫૩॥

શીત્કારકમલોત્કારવિપર્યસ્તલિપિક્રમૈઃ ।
ક એષાં ભૃતભસ્ત્રાણાં ચૌર્યસ્યોદ્ભાસને ક્ષમઃ ॥ ૧૩.૩૫૪॥

તેષાં લુણ્ઠકવૃત્તીનાં જૃમ્ભારમ્ભમૃજા જુષામ્ ।
નગરાણ્યેવ ચુલકં ગલગર્તગલદ્ગિરામ્ ॥ ૧૩.૩૫૫॥

તૈર્ઘટ્યમાનાં પૃથિવીં રક્ષેદ્વેતાલચેષ્ટિતૈઃ ।
યેષાં નરકપાકોગ્રપર્યન્તે વિષમા સ્થિતિઃ ॥ ૧૩.૩૫૬॥

યૌવનાશ્વં નરપતિં પ્રાગુતથ્યોઽવદન્મુનિઃ ।
પૃથિવીપાલને રાજન્કુરુ કણ્ઠકશોધનમ્ ॥ ૧૩.૩૫૭॥

અનાથાન્દુર્બલાન્રક્ષેત્કૃપણાંશ્ચાનુલેપયેત્ ।
રાજ્ઞાં હિ કૃપણાક્રન્દૈર્મૂલાન્નશ્યન્તિ સમ્પદઃ ॥ ૧૩.૩૫૮॥

અર્થોઽપ્યનર્થતાં યાતિ ભૂભુજાં જનપીડનાત્ ।
જનાપવાદપરશું સહતે શ્રીલતા કથમ્ ॥ ૧૩.૩૫૯॥

વદાન્યઃ સભ્યવાન્વીરઃ કૃતજ્ઞઃ સત્યવાક્પટુઃ ।
અભિજાતો ભવત્યેવ પ્રજાનાં સુકૃતૈર્નૃપઃ ॥ ૧૩.૩૬૦॥

ઉતથ્યેનેતિ કથિતે માન્ધાતા પૃથિવીપતિઃ ।

તથા શશાસ યશસા યથા જીવન્નિવ સ્થિતઃ ॥ ૧૩.૩૬૧॥

ઇતિ ભારતમઞ્જર્યાં ક્ષેમેન્દ્રવિરચિતા ઉતથ્યગીતા સમાપ્તા ।
શાન્તિપર્વણિ રાજધર્માઃ શ્લોકાનિ ૩૫૧-૩૬૧

*utathyagItA from Bharatamanjari of Kshemendra*

pdf was typeset on October 15, 2022

Please send corrections to *sanskrit@cheerful.com*